শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ চতুর্ৱিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ চতুর্ৱিংশঃ সর্গঃ ॥

## ৱারিণো ভিদ্যমানস্য কিমযং তুমুলো ধ্ৱনিরিতি নৌকাগতস্য রামস্য প্রশ্নং শ্রুৎৱা মুনিনা তস্যোত্তরদানং মলদকরূষতাটকাৱনানাং পরিচযং দত্ত্ৱা তাটকাৱধার্থং শ্রীরামস্য প্রেরণং চ

ততঃ প্রভাতে ৱিমলে কৃতাহ্নিকমরিন্দমৌ।
ৱিশ্ৱামিত্রং পুরস্কৃত্য নদ্যাস্তীরমুপাগতৌ॥ **1.24.1** ॥

তে চ সর্ৱে মহাত্মানো মুনযঃ সংশিতৱ্রতাঃ।
উপস্থাপ্য শুভাং নাৱং ৱিশ্ৱামিত্রমথাব্রুৱন্॥ **1.24.2** ॥

আরোহতু ভৱান্ নাৱং রাজপুত্রপুরস্কৃতঃ।
অরিষ্টং গচ্ছ পন্থানং মা ভূৎ কালস্য পর্যযঃ॥ **1.24.3** ॥

ৱিশ্ৱামিত্রস্তথেত্যুক্ত্ৱা তানৃষীন্ প্রতিপূজ্য চ।
ততার সহিতস্তাভ্যাং সরিতং সাগরঙ্গমাম্॥ **1.24.4** ॥

তত্র শুশ্রাৱ ৱৈ শব্দং তোযসংরম্ভৱর্ধিতম্।
মধ্যমাগম্য তোযস্য তস্য শব্দস্য নিশ্চযম্॥ **1.24.5** ॥

জ্ঞাতুকামো মহাতেজাঃ সহ রামঃ কনীযসা।
অথ রামঃ সরিন্মধ্যে পপ্রচ্ছ মুনিপুঙ্গৱম্॥ **1.24.6** ॥

ৱারিণো ভিদ্যমানস্য কিমযং তুমুলো ধ্ৱনিঃ।
রাঘৱস্য ৱচঃ শ্রুৎৱা কৌতূহলসমন্ৱিতম্॥ **1.24.7** ॥

কথযামাস ধর্মাত্মা তস্য শব্দস্য নিশ্চযম্।
কৈলাসপর্ৱতে রাম মনসা নির্মিতং পরম্॥ **1.24.8** ॥

ব্রহ্মণা নরশার্দূল তেনেদং মানসং সরঃ।
তস্মাৎ সুস্রাৱ সরসঃ সাযোধ্যামুপগূহতে॥ **1.24.9** ॥

সরঃপ্রৱৃত্তা সরযূঃ পুণ্যা ব্রহ্মসরশ্চ্যুতা।
তস্যাযমতুলঃ শব্দো জাহ্নৱীমভিৱর্ততে॥ **1.24.10** ॥

ৱারিসঙ্ক্ষোভজো রাম প্রণামং নিযতঃ কুরু।
তাভ্যাং তু তাৱুভৌ কৃৎৱা প্রণামমতিধার্মিকৌ॥ **1.24.11** ॥

তীরং দক্ষিণমাসাদ্য জগ্মতুর্লঘুৱিক্রমৌ।
স ৱনং ঘোরসঙ্কাশং দৃষ্টৱা নরৱরাত্মজঃ॥ **1.24.12** ॥

অৱিপ্রহতমৈক্ষ্ৱাকঃ পপ্রচ্ছ মুনিপুঙ্গৱম্।
অহো ৱনমিদং দুর্গং ঝিল্লিকাগণসংযুতম্॥ **1.24.13** ॥

ভৈরৱৈঃ শ্ৱাপদৈঃ কীর্ণং শকুন্তৈর্দারুণারৱৈঃ।
নানাপ্রকারৈঃ শকুনৈর্ৱাশ্যদ্ভির্ভৈরৱস্ৱনৈঃ॥ **1.24.14** ॥

সিংহৱ্যাঘ্রৱরাহৈশ্চ ৱারণৈশ্চাপি শোভিতম্।
ধৱাশ্ৱকর্ণককুভৈর্বিল্ৱতিন্দুকপাটলৈঃ॥ **1.24.15** ॥

সঙ্কীর্ণং বদরীভিশ্চ কিং ন্ৱিদং দারুণং ৱনম্।
তমুৱাচ মহাতেজা ৱিশ্ৱামিত্রো মহামুনিঃ॥ **1.24.16** ॥

শ্রূযতাং ৱৎস কাকুৎস্থ যস্যৈতদ্ দারুণং ৱনম্।
এতৌ জনপদৌ স্ফীতৌ পূর্ৱমাস্তাং নরোত্তম॥ **1.24.17** ॥

মলদাশ্চ করূষাশ্চ দেৱনির্মাণনির্মিতৌ।
পুরা ৱৃত্রৱধে রাম মলেন সমভিপ্লুতম্॥ **1.24.18** ॥

ক্ষুধা চৈৱ সহস্রাক্ষং ব্রহ্মহত্যা সমাৱিশৎ।
তমিন্দ্রং মলিনং দেৱা ঋষযশ্চ তপোধনাঃ॥ **1.24.19** ॥

কলশৈঃ স্নাপযামাসুর্মলং চাস্য প্রমোচযন্।
ইহ ভূম্যাং মলং দত্ত্বা দেৱাঃ কারূষমেৱ চ॥ **1.24.20** ॥

শরীরজং মহেন্দ্রস্য ততো হর্ষং প্রপেদিরে।
নির্মলো নিষ্করূষশ্চ শুদ্ধ ইন্দ্রো যথাভৱৎ॥ **1.24.21** ॥

ততো দেশস্য সুপ্রীতো ৱরং প্রাদাদনুত্তমম্।
ইমৌ জনপদৌ স্ফীতৌ খ্যাতিং লোকে গমিষ্যতঃ॥ **1.24.22** ॥

মলদাশ্চ করূষাশ্চ মমাঙ্গমলধারিণৌ।
সাধু সাধ্ৱিতি তং দেৱাঃ পাকশাসনমব্রুৱন্॥ **1.24.23** ॥

দেশস্য পূজাং তাং দৃষ্টৱা কৃতাং শক্রেণ ধীমতা।
এতৌ জনপদৌ স্ফীতৌ দীর্ঘকালমরিন্দম॥ **1.24.24** ॥

মলদাশ্চ করূষাশ্চ মুদিতা ধনধান্যতঃ।
কস্যচিত্ত্ৱথ কালস্য যক্ষিণী কামরূপিণী॥ **1.24.25** ॥

বলং নাগসহস্রস্য ধারযন্তী তদা হ্যভূৎ।
তাটকা নাম ভদ্রং তে ভার্যা সুন্দস্য ধীমতঃ॥ **1.24.26** ॥

মারীচো রাক্ষসঃ পুত্রো যস্যাঃ শক্রপরাক্রমঃ।
ৱৃত্তবাহুর্মহাশীর্ষো ৱিপুলাস্যতনুর্মহান্॥ **1.24.27** ॥

রাক্ষসো ভৈরৱাকারো নিত্যং ত্রাসযতে প্রজাঃ।
ইমৌ জনপদৌ নিত্যং ৱিনাশযতি রাঘৱ॥ **1.24.28** ॥

মলদাংশ্চ করূষাংশ্চ তাটকা দুষ্টচারিণী।
সেযং পন্থানমাব্বৃত্য ৱসত্যত্যর্ধযোজনে॥ **1.24.29** ॥

অত এৱ চ গন্তৱ্যং তাটকাযা ৱনং যতঃ।
স্ববাহুবলমাশ্রিত্য জহীমাং দুষ্টচারিণীম্॥ **1.24.30** ॥

মন্নিযোগাদিমং দেশং কুরু নিষ্কণ্টকং পুনঃ।
নহি কশ্চিদিমং দেশং শক্তো হ্যাগন্তুমীদৃশম্॥ **1.24.31** ॥

যক্ষিণ্যা ঘোরযা রাম উৎসাদিতমসহ্যযা।
এতত্তে সর্ৱমাখ্যাতং যথৈতদ্ দারুণং ৱনম্।
যক্ষ্যা চোৎসাদিতং সর্ৱমদ্যাপি ন নিৱর্ততে॥ **1.24.32** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে চতুর্ব্বিংশঃ সর্গঃ ॥